National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(50): 212-216
© 2023 NJHSR
www.sanskritarticle.com

**चापाटि षण्मुखजानकीरमणः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**चापाटि षण्मुखजानकीरमणः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# वैयाकरणसिद्धान्तकौमुदीव्याख्यायाः श्रीलक्ष्मीनृसिंहप्रणीतायाः विलासाख्यायाः तद्धितप्रकरणस्य स्थूलतः परिशीलनम्

**चापाटि षण्मुखजानकीरमणः**

**कूटशब्दाः -** वैयाकरणसिद्धान्तकौमुदी, कौमुदी, विलासः, व्याख्या, ग्रन्थः, पाठः, मातृका, तद्धितः, प्रत्ययः, अष्टाध्यायी, सूत्रम्, वार्तिकम्, भाष्यम्, काशिका, न्यास इत्येते शब्दाः निबन्धेऽस्मिन् मुख्याः भवन्ति।

**उपक्रमः -**

अष्टाध्यायीप्रक्रियाग्रन्थेषु भट्टोजिदीक्षितैः विरचितः सिद्धान्तकौमुदीनामकग्रन्थः शृङ्गायते। यतो हि पूर्वं विद्यमानेषु रूपावतार-प्रक्रियाकौमुदीत्यादिषु प्रक्रियाग्रन्थेषु अष्टाध्याय्याः समस्तसूत्राणां सन्निवेशः नासीत्, किन्तु भट्टोजिदीक्षितैः समग्राष्टाध्यायीसूत्राणि प्रकरणवशात् प्रविभज्य तदर्थवर्णनमकारि। समग्रग्रन्थस्य विभागश्च त्रयोदशसु प्रकरणेषु व्यधायि। तानि च – संज्ञा-परिभाषा-सन्धि-सुबन्त-अव्यय-स्त्रीप्रत्यय-कारक-समास-तद्धित-तिङन्त-कृदन्त-वैदिक-स्वर-नामधेयकानि वर्तन्ते। अतः सिद्धान्तकौमुदी प्रक्रियानुसारिपाणिनीयवृत्तिषु मूर्धन्यतां भजते। सैषा कौमुदी न केवलं शब्दरचनप्रक्रियामेव किन्तु वैयाकरणसिद्धान्तसंग्रहात्मकतया अवबोधे अधिकसारल्याद् अद्यत्वेऽतिमात्रं लब्धप्रचारा सञ्जाता। अतः आभाणकमिदं लोके प्रथितं वर्तते। यथा -

**कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।**
**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः ॥** इति।

भट्टोजिदीक्षितविरचितसिद्धान्तकौमुदीमधिकृत्य बहवः प्रकाशिताः अप्रकाशिताश्च व्याख्यानग्रन्थाः उपलभ्यन्ते। यद्यपि बह्व्यः व्याख्याः अस्याः कौमुद्याः लभ्यन्ते तथापि अन्येऽपि केचन व्याख्याग्रन्थाः सम्प्रत्यपि अप्रकाशिताः मातृकारूपेण उपलभ्यन्ते। तासु मातृकासु श्रीलक्ष्मीनृसिंहमहाशयप्रणीत-विलासव्याख्याऽपि अन्यतमा।

**ग्रन्थकर्तुः परिचयः -**

अस्य ग्रन्थस्य कर्ता श्रीलक्ष्मीनृसिंहमहाशयः। अयम् आन्ध्रदेशीयः गोदावरीमण्डलस्थः इत्यनुमीयते। एषः महीधरकुलसम्भवः, रामाम्बा-कोण्डुभट्टदम्पत्योः सुपुत्रः इति च ज्ञायते। अस्य महाशयस्य तद्धितप्रकरणसम्बन्धितया या व्याख्या वर्तते तत्र किञ्चिदिव परामृश्यते।

**१. तस्यापत्यम् -** ४.१.९२

'षष्ठ्यन्तादिति' इति प्रतीकात्परं 'षष्ठ्यन्तादित्यनेन' इति पदं दृश्यते। तत्र 'षष्ठ्यन्तादिभ्यः' इति पाठः समीचीन इति भाति।

**२. कुलटाया वा -** ४.१.१२७

एतत्सूत्रव्याख्यावसरे 'पूर्वेणैवेति' इति प्रतीकमाधृत्य कुलटाशब्दस्य कल्याणादिगणपठितत्वमाश्रित्य 'ढक्' प्रत्ययः उक्तः। सम्प्रत्युपलभ्यमाने गणपाठे अयं शब्दः न दृश्यते।

**३. दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्म-यानि -** ६.४.१७४

अस्मिन् सूत्रे दाण्डिनायन इत्यादयः एकादश शब्दाः निपातिताः। तत्र भौणहत्यशब्दस्य निपातनस्य आवश्यकता नास्ति। यतः, भ्रूणघ्नः भावः इत्यर्थे भ्रूणहन् शब्दात् भावे अर्थे "वर्णदृढादिभ्यः ष्यञ् च" इति सूत्रेण 'ष्यञ्' प्रत्यये, आदिवृद्धौ "हनस्तोऽचिण्णलोः" इति सूत्रेण णकारस्य स्थाने तकारादेशे कृते भौणहत्यशब्दः साधयितुं शक्यः। एवं स्थिते इदं निपातनं "धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्" इति परिभाषां ज्ञापयति। तेन "हनस्तोऽचिण्णलोः" इति सूत्रेण विधीयमानः तकारादेशः कृत्प्रत्यये परतः एव भवति, ष्यञ् तु न कृत्, किन्तु तद्धितः। अतः अप्राप्तः तकारादेशः अनेन निपात्यते। अत एव 'वृत्रहन्' शब्दात् तद्धिते अण् प्रत्यये कृते "हनस्तोऽचिण्णलोः" इति सूत्रेण णकारस्य तकारादेशः न भवति। अतः वार्त्रघ्नम् इत्येव रूपम्।

**४. ये चाभावकर्मणोः - ६.४.१६८**

एतत्सूत्रव्याख्यावसरे 'शूद्रायामिति' प्रतीकः विलासे दृश्यते। सम्प्रत्युपलभ्यमानेषु 'शूद्रादौ' इति पाठः दृश्यते। अत्र आदिशब्देन चण्डालादीनां ग्रहणम्। एवञ्च अर्थे नास्त्यत्र भेदः। केवलम् आदिशब्दस्य योजने तदयोजने च भेदः।

**५. कुलात् खः - ४.१.१३९**

एतत्सूत्रव्याख्यावसरे 'कौरव्याः ब्राह्मणाः' इति प्रतीकः दृश्यते विलासे। तत्र ब्राह्मणपदप्रयोगस्य सार्थक्यमपि विलासकारेण स्पष्टं विवृतम्। एवं स्थिते एकस्यां मातृकायान्तु (T) 'बहुवचनग्रहणम्' इति पाठः लभ्यते। स तु असङ्गतः।

**६. अतश्च - ४.१.१७७**

"शूरसेनीति। द्व्यञ्मगधेत्यणो लुक्। मद्रीति। अत्र जनपदशब्दादित्यञो लुक्" इति पङ्क्तिः विलासे दृश्यते। सा व्यत्यस्ता इति भाति। तत्र हि पङ्क्तिरेवं भवितुमर्हति - "शूरसेनीति। अत्र जनपदशब्दादित्यञो लुक्। मद्रीति द्व्यञ्मगधेत्यणो लुक्" - इति।

**७. तेन रक्तं रागात् - ४.२.१**

एतत्सूत्रव्याख्यावसरे 'लाक्षेति' इति प्रतीकात्परं 'पुनश्च त्रीणि वार्तिकानि लिखति' इति पाठः दृश्यते। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु तु चत्वारि वार्तिकानि दृश्यन्ते। काशिकायामपि चत्वारि एव वार्तिकानि दृश्यन्ते। एवं स्थिते विलासे 'त्रीणि वार्तिकानि' इति कथं वा पठितं स्यादिति जिज्ञासे।

**८. लुबविशेषे - ४.२.४**

अत्र 'षष्टिदण्डेति' इति प्रतीकव्याख्यावसरे 'केषुचित्कोशेषु' इति श्रूयते। तत्र कोशशब्दः ग्रन्थपरः। तथा च केषुचिद्ग्रन्थेषु इत्यर्थः। एवं स्थिते एकस्यां मातृकायान्तु 'ग्रन्थेषु' इति पाठः लभ्यते। अर्थे तु न कश्चन भेदः।

**९. दृष्टं साम - ४.२.७**

एतत्सूत्रव्याख्यावसरे कारिकायां पूर्वार्धे 'अण् डिद् द्विर्वा' इत्यस्य स्थाने 'द्विरण् डिद्वा' इति पाठः काशिकायां दृश्यते। उभयथापि अर्थे भेदः नास्ति, केवलं पाठे एव भेदः।

कारिकार्थः -

दृष्टं साम, तत्र जातः इत्यर्थद्वये अण् प्रत्ययस्य डित्त्वं विकल्पतया विधीयते। तीयप्रत्ययान्तात् ईकक् प्रत्ययः विधीयते। विद्या इत्यर्थे तु अयम् ईकक् प्रत्ययः न विधीयते। गोत्रप्रत्ययान्तात् "सङ्घाङ्कलक्षणेष्वञ्यञिञामण्"[1] इति सूत्रेण अङ्कार्थे विहितः प्रत्ययः विधीयते - इति।

**१०. कत्र्यादिभ्यो ढकञ् - ४.२.९५**

अत्र 'कुत्सिताः' इति प्रतीकमादाय ""त्रौ च"[2] इति सूत्रेण कोः कदादेशः' इति पाठः दृश्यते। वस्तुतस्तु नेदं सूत्रम्, किन्तु वार्तिकमेव।

**११. द्युप्रागपागुदक्प्रतीचो यत् - ४.२.१०१**

अत्र अपाच्यमिति प्रतीके परकारस्य स्थाने वकारमभ्युपगम्य अवाच्यमिति पाठः वृत्त्यादौ लभ्यते इत्युक्तं विलासे। अत्र किञ्चिद् निवेद्यते - सम्प्रत्युपलभ्यमानेषु केषुचित् काशिकाग्रन्थेषु अवाच्यमिति पाठः दृश्यते। तत्र टिप्पन्यां - 'अपाच्यम्' इत्येव उचितमिति नागेशभट्टः - इति दृश्यते। इतरेषु वृत्तिग्रन्थेषु तु मूले एव अपाच्यम् इति पाठः दृश्यते। तदवलम्ब्य विलासे व्याख्यातम् - 'अत्र द्वितीयो वर्णः वकारः वृत्त्यादौ' इति।

**१२. भवतष्ठक्छसौ - ४.२.११५**

अत्र 'जश्त्वमिति' प्रतीकमादाय - 'भसंज्ञाया एव बाधात्' इति विलासे दृश्यते। अत्र 'एव' शब्दस्य आवश्यकता नास्त्येव।

**१३. नगरात् कुत्सनप्रावीण्ययोः - ४.२.१२८**

सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु काशिकावृत्त्यादिग्रन्थेषु वा 'कुत्सन' इत्येव पाठः दृश्यते। विलासकारैस्तु 'कुत्सित' इति प्रतीकः स्वीकृतः। अनेन ज्ञायते तैः प्राप्ते कौमुदीग्रन्थे एतत्सूत्रव्याख्यावसरे 'कुत्सित' इत्येव पाठः लब्धः स्याद्वा - इति।

अत्रैवाग्रे 'तयोरिति' इति प्रतीकः स्वीकृतः। तदर्थश्च वर्णितः। किन्तु सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'तयोः' इत्यस्य स्थाने 'कुत्सने इति किम्' इत्येव पाठः दृश्यते। वृत्तिग्रन्थे च 'कुत्सनप्रावीण्ययोरिति किम्' इत्येव पाठः दृश्यते।

**१४. अरण्यान्मनुष्ये - ४.२.१२९**

एतत्सूत्रव्याख्यावसरे 'ण इत्यस्येति' इति प्रतीकमादाय 'अरण्याण्ण[3] इत्यस्येत्यर्थः' इति तदर्थो वर्णितः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु तु मूले एव इदं प्रोक्तम्।

**१५. गहादिभ्यश्च - ४.२.१३८**

एतत्सूत्रव्याख्यावसरे 'गहीयमिति' इति प्रतीकात्परम् – 'अत्र 'मध्यमध्यमं चाण् चरण' इति पठ्यते। मध्यशब्दः प्रत्ययमुत्पादयति, तत्सन्नियोगेन मध्यमभावञ्चापद्यते। मध्यमीयाः - पृथिवीमध्यदेशे भवाः इति तदर्थः। चरणे तु प्रत्ययार्थे अण् भवति माध्यमा इति तदर्थः' इति व्याख्यातं विलासकारैः। सिद्धान्तकौमुद्यां एतद्विचारः न कृत एव। वृत्तिग्रन्थमाधृत्य विलासकारैः इदं व्याख्यातम्।

अस्यैव सूत्रस्य व्याख्यावसरे 'स्वकस्येति' इति प्रतीकं स्वीकृत्य किञ्चिद्व्याख्यातम्। अत्र स्वशब्दात् छप्रत्यये सति स्वीयम् इत्येव रूपं स्यात्। स्वकीयमिति रूपं न सिद्ध्येत्। प्रतीकस्तु स्वकस्य इति स्वीकृतः। विवरणे तु स्वशब्दात् छप्रत्ययः इति निरूपितम्। प्रतीकानुसारेण स्वकीयशब्दस्य निष्पत्तिः, पङ्क्तिव्याख्यानुसारेण तु स्वीयशब्दः निष्पद्यते इति उभयोः महदन्तरं वर्तते। कौमुद्यनुसारेण तु 'स्वस्य च' इति प्रतीकः दृश्यते। तत्र 'कुग्जनस्य परस्य च' इति गणसूत्रात् कुक् इति पदमनुवर्तते। तथा च स्वशब्दात् छ प्रत्ययः, स्वशब्दस्य कुगागमश्च इति हेतोः स्वकीयशब्दः निष्पद्यते।

शब्दकौस्तुभे तु स्वार्थे कन् प्रत्ययान्तात् स्वकशब्दात् छप्रत्यये कृते स्वकीयशब्दः निष्पद्यते। अस्य शब्दस्य प्रयोगः 'लुपियुक्तवद्व्यक्ति-वचने' इति न्यासग्रन्थेऽपि दृश्यते इति व्याख्यातम्। चान्द्रव्याकरणे तु "स्वजनपरदेवराज्ञां कुक् च" इति सूत्रं पठितम्। स्व, जन, पर, देव, राजन् इति शब्देभ्यः छप्रत्ययः, कुगागमश्च प्रवर्तते इति तदर्थः। अनया रीत्या तैः स्वकीयशब्दः साधितः।

अतः विलासस्य कौमुदीव्याख्यानत्वेन तद्रीत्या 'स्वस्येति' इति प्रतीकधारणमेव समीचीनं स्यादिति मे भाति।

**१६. तस्मिन्नणि च युष्माकास्माकौ - ४.३.२**

एतत्सूत्रव्याख्यावसरे 'तस्मिन्निति' इति प्रतीकमादाय 'तच्छब्देन कण्ठतः निर्दिष्टः खञेव परामृश्यते' इति विलासे व्याख्यातम्। एतदर्थिकैव व्याख्या तत्त्वबोधिन्यामपि दृश्यते। 'कण्ठतः' इत्यस्य स्थाने 'साक्षात्' इति पदं दृश्यते। तत्त्वबोधिन्यान्तु अयं विशेषः दृश्यते - प्रकृतसूत्रे श्रूयमाणेन चशब्देन खञ् प्रत्ययः आकृष्यते, किन्तु 'तस्मिन्' इत्यत्र श्रूयमाणेन तच्छब्देनैव खञ् निर्दिश्यते - इति।

अत्र 'युष्मदस्मदोरिति' इति प्रतीकतः पूर्वं 'खञणोरिति वक्तव्ये' इत्यादि व्याख्यातम्। खञ् च अण् च खञणौ, तयोः = खञणोः इति द्वन्द्वसमासाश्रयणेन अभीष्टार्थसम्भवे 'तस्मिन्', 'अणि' इत्येवं पृथक् विभक्तिनिर्देशसामर्थ्यात् यथासंख्यमन्वयः न भवति। अन्यथा खञ्प्रत्यये परे 'युष्माक' इत्यादेशः, अण्प्रत्यये परे 'अस्माक' इत्यादेशः इत्येवमनिष्टं प्रसज्येत। एतादृशानिष्टपरिहाराय अत्र व्यस्तोच्चारणं कृतमिति विलासकाराणामाशयः। अयमाशयः तत्त्वबोधिन्यामपि वर्णितः। अयमेवाशयः भङ्ग्यन्तरेण काशिकायामपि दर्शितः।

**१७. तवकममकावेकवचने - ४.३.३**

एतत्सूत्रव्याख्यावसरे 'तवकेति' इति प्रतीकमादाय पूर्वस्मिन् सूत्रे इव प्रकृतेऽपि यथासंख्यान्वयः न भवतीति प्रतिपादितम्।

**१८. प्रत्ययोत्तरपदयोश्च - ७.२.९८**

एतत्सूत्रव्याख्यावसरे 'अनयोरिति' इति प्रतीकः दृश्यते। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु तु अयं प्रतीकः नास्ति। 'मपर्यन्तयोः' इति दृश्यते।

**१९. प्रभवति - ४.३.८३**

"भुवः प्रभवः"[4] इति सूत्रम् अपादानसंज्ञाविधायकमेव, न तु पञ्चमीविधायकम्। पञ्चमीविभक्तिस्तु "अपदाने पञ्चमी"[5] इति सूत्रेण।

**२०. तस्य विकारः - ४.३.१३४**

अत्र मार्तिकमिति नपुंसकलिङ्गप्रतीकः दृश्यते। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु पुल्लिङ्गशब्दः दृश्यते। अत्र केवलं लिङ्गे एव भावः।

**२१. त्रपुजतुनोः षुक् - ४.३.१३८**

एतत्सूत्रव्याख्यावसरे 'कारीति' इति प्रतीकः स्वीकृतः। क्वचित् कौमुदीग्रन्थेषु 'माशब्दं कार्षीः' इति पाठः दृश्यते। स तु अपपाठः।

**२२. चरति - ४.४.८**

एतत्सूत्रव्याख्यावसरे 'मयतेरिदन्यतरस्यामिति क्त्वो ल्यबादेशे' इति पाठः अस्ति। स तु न समीचीनः। यतः तत्तु सूत्रम् इकारादेश-विधायकम्, न तु ल्यबादेशविधायकम्। अतः अत्र पङ्क्तिलेखने प्रमादोऽवलोक्यते।

**२३. तत् प्रत्यनुपूर्वमीपलोमकूलम् - ४.४.२८**

एतत्सूत्रव्याख्यावसरे 'तत्प्रतीति' इति प्रतीके - अत्र पञ्चम्याः स्थाने व्यत्ययेन प्रथमेत्याशयेनाह - द्वितीयान्तादिति। अयमपपाठः। तत्र पङ्क्तिरेवं भवेत् - 'तच्छब्दार्थमाह - द्वितीयान्तादिति' - इत्येव। अत्र पञ्चमीविभक्तिर्वा, प्रथमाविभक्तिर्वा न दृश्यत एवेति हेतोः

अयमपपाठः।

**२४. तत्र साधुः - ४.४.९८**

एतत्सूत्रव्याख्यावसरे 'सामस्विति' इति प्रतीकस्य व्याख्यानात्परम् 'अग्र्य इति' इति प्रतीकः स्वीकृतः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु प्रतीकः व्यत्यस्तः।

**२५. वतोरिड्वा - ५.१.२३**

एतत्सूत्रव्याख्यावसरे 'पञ्चमीबलादनुवृत्तस्य कनित्यस्य षष्ठ्यन्तत्वं कल्प्यत इत्याशयेनाह - वत्वन्तादिति।' - इति प्रतीकः दृश्यते। अशुद्धोऽयं पाठः वत्वन्तादित्यस्य स्थाने 'कन इति' इत्येव प्रतीकः भवितुमर्हति। अत्र वत्वन्तादिति अशुद्धः पाठः।

अत्रैवाग्रे 'बहुगणवत्विति। संख्यात्वेन सिद्धस्य कन इत्यर्थः।' इति पङ्क्तिः दृश्यते। तत्र "बहुगण"[6] इत्यादिसूत्रस्य कन् प्रत्ययस्य च ईषदपि सम्बन्धः नास्ति। अतः इयं पङ्क्तिरत्र न घटते एव।

**२६. द्वित्रिपूर्वादण् च - ५.१.३६**

एतत्सूत्रव्याख्यावसरे 'अस्य वार्तिकस्यार्थमाह' इति पङ्क्तिः वर्तते। इयञ्च सर्वात्माना अशुद्धा। प्रकृतस्य सूत्रत्वेन वार्तिकत्वाभावात्। अतः '"शाणाद्वा"[7] इति सूत्रानुवृत्तिमभ्युपगम्याह' इत्येवं हि पाठः भवेत्। अत्रैव सूत्रे 'इति ठञादयः' इति प्रतीकः स्वीकृतः विलासे। 'इह ठञादयः' इत्येव पाठः शुद्धः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु अयमेव पाठः लभ्यते।

**२७. तद्धरति वहत्यावहति भाराद्वंशादिभ्यः - ५.१.५०**

एतत्सूत्रव्याख्यावसरे आरम्भे एव 'अतः परं ठञेव' इति पङ्क्तिरस्ति। इयञ्च पङ्क्तिः पूर्वतने सूत्रे मूले एव लभ्यते। प्रायः विलासकारलब्धे कौमुदीमूले इयं पङ्क्तिः न स्यादिति भाति।

**२८. छेदादिभ्यो नित्यम् - ५.१.६४**

सिद्धान्तकौमुद्यां 'वैरागिकः' इति ठक्प्रत्ययान्तोऽपि दृश्यते। काशिकादौ तु न दृश्यते। मन्ये काशिकाग्रन्थं मनसि निधायैव 'वैरङ्गिकः' इति एकमेव रूपं प्रदर्शितवान् विलासकारः। एवं स्थिते वैरागिकः इति रूपस्य कथमुपपत्तिः इत्यत्र पण्डिताः प्रमाणम्।

**२९. तत्र च दीयते कार्यं भववत् - ५.१.९६**

एतत्सूत्रव्याख्यावसरे 'शारदमिति' इति प्रतीकमादाय किञ्चिद्व्याख्यातम्। तत्र न कोऽपि दोषः, किन्तु तदपेक्षया 'प्रावृषेण्यम्' इति प्रतीकः यदि स्वीक्रियते, तत् समीचीनम्। यतः "प्रावृष एण्यः"[8] इति सूत्रेण विशिष्य प्रावृष् शब्दं स्वीकृत्य 'एण्य' प्रत्ययः भवार्थे विहितः स च दीयते, कार्यम् इत्यर्थद्वये च प्रवर्तते इति यदि व्याख्यातमभविष्यत्, तर्हि सुष्ठु अभविष्यत्।

**३०. आकालिकडाद्यन्तवचने - ५.१.११४**

प्रकृतसूत्रव्याख्यावसरे 'समानकालस्येति' इति प्रतीके 'प्रत्ययस्तु ठञ् सिद्ध एवेति नोक्तः' इति व्याख्यातम्। अधिकारात् ठञ् प्रत्ययः लभ्यत इति हेतोः ठञः निपातनस्य आवश्यकता नास्तीति विलासकाराणामाशयः। एवं स्थिते पदमञ्जर्यां तत्त्वबोधिन्यां च 'इकट् प्रत्ययः निपात्यते' इति व्याख्यातम्। को वा आशयः अत्र समीचीनः इति शङ्का आयाति। महाभाष्यपरिशीलने विलासकारमतं न निराकर्तुं योग्यः इति भाति।

**३१. शालीनकौपीने अधृष्टाकार्ययोः - ५.२.२०**

एतत्सूत्रव्याख्यावसरे 'कूपेति' इति प्रतीकमादाय विलासे किञ्चिद्व्याख्यातम्। एतदपेक्षया बालमनोरमातः स्पष्टः अवबोधो भवति। किञ्च अत्र व्याख्याने 'ख' प्रत्ययः दर्शितः। वस्तुतस्तु खञ् प्रत्यय एवात्र। अत एव आदिवृद्धिर्लभ्यते।

**३२. तसौ मत्वर्थे - १.४.१९**

एतत्सूत्रव्याख्यावसरे 'मधुर इति' इति प्रतीकमादाय यद्व्याख्यातं तत् न युज्यते। तत्र 'मधुर' इत्यस्य स्थाने 'खर' इति प्रतीकः भवति चेत् व्याख्यानं सुष्ठु सङ्गच्छते।

**३३. अस्मायामेधास्रजो विनिः - ५.२.१२१**

एतत्सूत्रव्याख्यावसरे 'शीतोष्णेति' इति प्रतीके 'आलुः प्रत्ययः' इति वर्णितम्। वस्तुतस्तु नायम् आलुप्रत्ययः, किन्तु चालुप्रत्ययः। स च "हृदयाच्चालुरन्यतरस्याम्" इति वार्तिकादनुवर्तते। "बहुलं छन्दसि"[9] भाष्ये, तत्त्वबोधिन्याञ्च 'चालु' इत्येव प्रत्ययः पठितः। अतः विलासे 'आलु' इति प्रत्ययकथनं न समीचीनम्।

**३४.सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः - ५.३.२२**

पूर्वपूर्वतयोरिति प्रतीकमादाय यद्व्याख्यातं, तत्र इदमपि योजनीयमिति भाति - 'पूर्व-पूर्वतरशब्दयोः स्थाने 'पर' इत्यादेशश्च' - इति।

अत्रैव सूत्रे 'द्यश्चेति' इति प्रतीके अहनीत्यर्थः इति विलासे पाठः। तत्र 'अस्मिन्नहनि' इति पाठः योग्यः। अयमेव पाठः सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु लभ्यते।

**३५. अज्ञाते - ५.३.७३**

'सर्वनाम्न' इति प्रतीकमाधृत्य यद्व्याख्यातं तत्र अस्पष्टता वर्तते। किञ्च 'अन्यत्र तु सुबन्तस्य टेः प्रागकच्' इति पाठोऽपि तत्र न दृश्यते। स पाठः भवति चेदेव अर्थः सुगमः, नान्यथा।

**३६. वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे - ५.३.९१**

एतत्सूत्रव्याख्यावसरे 'वत्सतर इति' इति प्रतीके - 'अश्वेन अश्वायामुत्पन्नः' इति पाठः विलासे दृश्यते। तत्र तृतीयान्तः पाठः न शुद्धः। "जनिकर्तुः प्रकृतिः"[10] इति सूत्रेण अपादानसंज्ञा निमित्तिका पञ्चमीविभक्तिरेव तत्र शुद्धा। अतः अत्र 'अश्वात्' इत्येव पाठः समीचीनः।

**३७. अपादाने चाहीयरुहोः - ५.४.४५**

'पटपटाकरोति' इति प्रतीकव्याख्यावसरे 'षित्त्वसामर्थ्यात् टिलोपे रूपम्' इति पङ्क्तिः वर्तते। षित्त्वे टिलोपविधानन्तु नैव दृश्यते। अतः 'डित्त्वसामर्थ्यादित्येव' इति पाठः तत्र भवेत्।

**उपसंहारः -**

इत्थमत्र निबन्धे तद्धितप्रकरणसम्बन्धितया किञ्चिदिव परामृष्टम्।

**उपयुक्तग्रन्थसूची -**


1. (G.O.M.L. Madras) Ms. No. D. 1448 तालपत्रमातृका। ग्रन्थलिप्यां लिखिता। 16 5/8 x 1½ परिमाणवती। 227 पत्राणि। प्रतिपत्रं दश पङ्क्तयः। उत्तमावस्थायामस्ति।
2. (G.O.M.L. Madras) Ms. No. D. 1446 तालपत्रमातृका। तेलुगुलिप्यां लिखिता। 18½ x 1½ परिमाणवती। 307 पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। किञ्चिदिव भग्ना।
3. (G.O.M.L. Madras) Ms. No. R. 138 तालपत्रमातृका। ग्रन्थलिप्यां लिखिता। 19 x 1½ परिमाणवती। 250 पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। एकस्मिन् पार्श्वे भग्ना।
4. (N.S.U. Tirupati) Ms. No. 1507 तालपत्रमातृका। ग्रन्थलिप्यां लिखिता। 152 पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। किञ्चिदिव भग्ना।
5. (N.S.U. Tirupati) Ms. No. 1517 तालपत्रमातृका। ग्रन्थलिप्यां लिखिता। 212 पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। किञ्चिदिव भग्ना।
6. अष्टाध्यायी - पाणिनिः, व्याख्याकारः – डा. नरेश झा; प्रकाशकः – चौखम्वा सुरभारती प्रकाशन, वाराणसी, २००६।
7. काशिकावृत्तिः-वामनजयादित्यविरचिता, न्यासपदमञ्जरीसहीता, सुधीप्रकाशनम्, वाराणसी, १९८४ ।
8. न्यासः - जिनेन्द्रबुद्धिः, ताराप्रकाशनम्, वाराणसी, १९६६।
9. पदमञ्जरी - हरदत्तः, ताराप्रकाशनम्, वाराणसी, १९६६।
10. परिभाषेन्दुशेखरः - नागेशाभट्टः, व्याक्याकारः – विश्वनाथ-मिश्रः, प्रकाशकः – चौखम्बा सुरभारती प्रकाशन, वाराणसी।
11. पाणिनीयशिक्षा - पाणिनिः, मनोमोहनघोषसम्पादिता, कलकात्ता, १९३८।
12. लघुशब्देन्दुशेखरः - नागेशभट्टः, व्याख्याता-आचार्यः श्रीपाद सत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००५।
13. वाक्यपदीयम् - भर्तृहरिः, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, २००६।
14. वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षितः, चौखम्बा, १९५८।
15. वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षितः, टीकात्रयसमल-ङ्कृता, भारतीय विद्या प्रकाशन, २००५।
16. व्याकरण-महाभाष्यम् - पतञ्जलिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, १९९८।
17. शब्दकल्पद्रुमः - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९६७।


**पाद टिप्पणी -**

[1] अष्टाध्यायी. ४.३.१२७ संघाङ्कलक्षणेष्वञ्यञिञामण्

[2] वार्तिकम्

[3] वार्तिकम्

[4] अष्टाध्यायी. १.४.३१ भुवः प्रभवः

[5] अष्टाध्यायी. २.३.२८ अपादाने पञ्चमी

[6] अष्टाध्यायी. १.१.२३ बहुगणवतुडति संख्या

[7] अष्टाध्यायी. ५.१.३५ शाणाद्वा

[8] अष्टाध्यायी. ४.३.१७ प्रावृष एण्यः

[9] अष्टाध्यायी. ५.२.१२२ बहुलं छन्दसि

[10] अष्टाध्यायी. १.४.३० जनिकर्तुः प्रकृतिः